# rAgagaNAnAM shrIkRiShNachandrastavam

# રાગગણાનાં શ્રીકૃષ્ણચન્દ્રસ્તવમ્

## Document Information

Text title : rAgagaNAnAM shrIkRiShNachandrastavam from Gargasamhita

File name : kRiShNachandrastavarAgagaNAnAMgargasamhitA.itx

Category : vishhnu, krishna, stotra, vishnu

Location : doc_vishhnu

Transliterated by : Vishwas Bhide vrbhide at rediffmail.com

Proofread by : Vishwas Bhide, PSA Easwaran

Description-comments : gargasamhitA

Acknowledge-Permission: Vishwas Bhide http://satsangdhara.net/

Latest update : February 3, 2016

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# રાગગણાનાં શ્રીકૃષ્ણચન્દ્રસ્તવમ્

શ્રીનારદ ઉવાચ -
ભૈરવાદ્યા રાગગણાઃ પુરઃ પ્રાપ્તા હરેઃ પ્રભોઃ ।
રૂપાનુરૂપાવયવાં તનું દૃષ્ટ્વાતિહર્ષિતાઃ ॥ ૧॥

યત્ર યત્ર ચ તેષાં વૈ દૃષ્ટિઃ પ્રાપ્તા હરેસ્તનૌ ।
તત્ર સ્થિતા ચ નિર્ગન્તું લાવણ્યાન્ન શશાક હ ॥ ૨॥

અહો શ્રીકૃષ્ણચન્દ્રસ્ય રૂપમત્યદ્ભુતં હરેઃ ।
દૃષ્ટ્વોપવર્ણનં તસ્ય ચક્રુસ્તેઽપિ પૃથક્ પૃથક્ ॥ ૩॥

ભૈરવ ઉવાચ -
ભજ હરિજાનુદ્વયમિતિ લક્ષ્મીઃ ।
ભજતિ સદાઙ્કે કમલકરાભ્યામ્ ॥ ૪॥

મેઘમલ્લાર ઉવાચ -
ઊરૂ વિષ્ણો રમ્ભાખણ્ડૌ હેમસ્તમ્ભૌ ધ્યાયે વન્દ્યૌ ।
ઓજઃ પૂર્ણૌ શોભાયુક્તૌ વસ્ત્રાપીતૌ કૃષ્ણસ્યોભૌ ॥ ૫॥

દીપક ઉવાચ -
સકલસુખકરં કનકરુચિધરમ્ ।
પ્રથિતહરિપદં ભજત કટિતલે ॥ ૬॥

માલકોશ ઉવાચ -
કટી કેશવાદ્યા હરેરસ્તિ તત્ર નૃણાં નેત્રયોર્દૃષ્ટિમાનં હરન્તિ ।
પરં કમ્પિતા મન્દગચ્છત્સમીરૈઃ સુનમ્રેણ સા સર્વચેતોહરેત્થમ્ ॥ ૭॥

શ્રીરાગ ઉવાચ -
નાભેઃ સરઃ પુષ્કરકુણ્ડવચ્ચ તલ્લસત્ત્રિવલ્લ્યૂર્મિમનોહરં પદમ્ ।
રોમાવલિપ્રોજ્ઝિતકામકાનનં ભજામિ નિત્યં હૃદિ રાધિકાપતેઃ ॥ ૮॥

હિણ્ડોલ ઉવાચ -

અક્ષરપઙ્ક્તિઃ કિન્વલિપઙ્ક્તિઃ પિપ્પલપત્રે મોહનમાલા ।
કિં કમલે યચ્છ્યામલરેખા કિં હ્યુદરે રોમાવલિરેખા ॥ ૯॥

ભૈરવરાગિણ્ય ઊચુઃ
પીતપટં યત્કૃષ્ણહરેરિન્દ્રધનુર્વદ્દીપ્તિયુતમ્ ।
કાઞ્ચનશિલ્પૈશ્ચારુરુચિ તદ્ભજ નૃણાં દુઃખહરમ્ ॥ ૧૦॥

ભૈરવપુત્રા ઊચુઃ
ચતુઃસમુદ્રા ઇવ વિશ્વપૂરકા આનન્દદા એવ ચતુષ્પદાર્થવત્ ।
તે બાહવો લોકવિતાનદણ્ડવજ્જયન્તિ ભૂધારણદિગ્ગજા ઇવ ॥ ૧૧॥

મેઘમલ્લારરાગિણ્ય ઊચુઃ
અરુણબિમ્બફલદ્યુતિમણ્ડિતં ભજ હરેરધરં મધુરં મનઃ ।
નવજપાદલમલ્લસુવિગ્રહં સકલવલ્લભભૂમિપતેઃ પ્રભોઃ ॥ ૧૨॥

મેઘમલ્લારપુત્રા ઊચુઃ
કર્પૂરકેતકસુમૌક્તિકહીરકાણાં
    શ્રીખણ્ડચન્દ્રચપલામૃતમલ્લિકાનમ્ ।
તેષાં રુચેશ્ચ પરિભાવમકારિ પૂર્વં
    યા દન્તપઙ્ક્તિરમલા સ્મરતાં પરસ્ય ॥ ૧૩॥

દીપકરાગિણ્ય ઊચુઃ
નયનયુગલજાતં પાતુ નોઽહર્નિશં તે
    મદનશરપરોક્ષં સર્વલાવણ્યદીક્ષમ્ ।
પરિહૃતસુરવૃક્ષં કોટિશો લક્ષલક્ષં
    નિજજનકૃતરક્ષં દાનદક્ષં કટાક્ષમ્ ॥ ૧૪॥

દીપકપુત્રા ઊચુઃ
કિં વા કુલિઙ્ગયુગલં નવપદ્મમધ્યે
    દુઃખક્ષાયાય વસતાં નિશિતાસિયુગ્મમ્ ।
જૈત્રં ધનુર્જયતિ કિં મકરધ્વજસ્ય
    ભ્રૂમણ્ડલં કિમથ ચન્દ્રમુખે પરસ્ય ॥ ૧૫॥

માલકોશરાગિણ્ય ઊચુઃ
પરિનૃત્યતિ ઇન્દુમણ્ડલે ફણિપત્ન્યાવિવ લોલકુણ્ડલે ।
કમલે મકરન્દનિર્ભરે ભ્રમરાલીવ સુગણ્ડમણ્ડલે ॥ ૧૬॥

માલકોશપુત્રા ઊચુઃ
રવિરેવ ખમણ્ડલે કિમુ યદુભર્તુસ્ત્વથવા ઘને તડિત્ ।
અધિતિષ્ઠતિ ગણ્ડમણ્ડલં દ્યુતિખણ્ડં કલધૌતકુણ્ડલમ્ ॥ ૧૭॥

શ્રીરાગિણ્ય ઊચુઃ
કલિઙ્ગયોઃ ખઞ્જનયોઃ કિલારાદાપત્યતાં યુદ્ધમભૂદલીનામ્ ।
તેષાં ગતઃ કીર ઉષઃપ્રફુલ્લે ચકાસ્તિ પદ્મેઽરુણબિમ્બલિપ્સુઃ ॥ ૧૮॥

શ્રીરાગપુત્રા ઊચુઃ
પરિકરીકૃતપીતપટં હરિં શિખિકિરીટનતીકૃતકન્ધરમ્ ।
લગુડવેણુકરં ચલકુણ્ડલં પટુતરં નતવેષધરં ભજે ॥ ૧૯॥

હિણ્ડોલરાગિણ્ય ઊચુઃ
અતસીકુસુમોપમેયકાન્તિર્યમુનાકૂલકદમ્બમધ્યવર્તી ।
નવગોપવધૂવિહારશાલી વનમાલી વિતનોતુ મઙ્ગલાનિ ॥ ૨૦॥

હિણ્ડોલપુત્રા ઊચુઃ -
હરે મત્સમઃ પાતકી નાસ્તિ ભૂમૌ તથા ત્વત્સમો નાસ્તિ પાપાપહારી ।
ઇતિ ત્વાં ચ મત્વા જગન્નાથદેવં યથેચ્છા ભવેત્તે તથા માં કુરુ ત્વમ્ ॥ ૨૧॥

શ્રીનારદ ઉવાચ -
ઇતિ રાગકૃતં ધ્યાનં યઃ શ઼ૃણોતિ પઠેત્સદા ।
તન્નેત્રગોચરો યાતિ ભગવાન્ ભક્તવત્સલઃ ॥ ૨૨॥

ઇતિ ગર્ગસંહિતાયાં વિશ્વજિત્ખણ્ડે પઞ્ચચત્વારિંશદધ્યાયાન્તર્ગતં
રાગગણાનાં સ્તવમ્ ।

Garga Samhita, Vishwajitkhanda, Adhaya 45
Encoded by Vishwas Bhide vrbhide at rediffmail.com http://satsangdhara.net/
Proofread by PSA Easwaran

---

*rAgagaNAnAM shrIkRiShNachandrastavam*
pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*